न्वादेरपि पुत्रादिमुखदर्शनं हृष्टो नांदीमुखात् ॥ पितरं नित्यादिवाक्यानुसाराज्जा ॥ ॥५४॥

कर्मणि नांदिमुखश्राद्धमाचांनभवत्येव ॥ यत्तु प्रसङ्गे जातकर्मणीति संग्रहकारवच
नादग्निस्थापनं केचिदिच्छंति ॥ तत्कालातिक्रमे सत्यपि । क्रियमाणे जातकर्मण्यय
तंत्रेण व्याहृतिहोमरूपतया प्रायश्चित्तविषयं ॥ ॥ इति मेधाजननकर्म ॥ अथ ज्योत्स्नाकर्म ॥
॥ तत्र यदि शुक्लपक्षे जन्म स्यात्तदा पंचमपक्षे तृतीयायां ॥ कृष्णपक्षे जन्म स्यात्तदा षष्ठमपक्ष
स्य तृतीयायां ॥ ततः प्रातरेव सशिरस्कं कुमारं स्नापयेत् ॥ ततो मातृयज्ञं सर्वं कुमाभ्युद
यिकं श्राद्धं ॥ अथास्तमिते रवौ विगते संध्याभागे पिता कृतांजलिः चंद्रमुपतिष्ठते ततो
माता शुचिना वसनेन मुखवर्जं कुमारमाच्छाद्य दक्षिणतः स्थित्वोदक्शिरसं कुमारं ।
१ पति पित्रे प्रदाय ॥ पृष्ठतः परिक्रम्योत्तरतः चंद्राभिमुखावतिष्ठते ॥ तथा च स्थितः पिता मंत्रत्रयं जपेत् ॥

55 ॥अथ धाममपिदह्न॰ अह्नष्टुप्॰ चंद्रोदे॰॥अमावस्यचंद्रदर्शने वि॰॥ॐ यत्ते सुसीमे हृदयं
हितमंतः प्रजापतौ॥वेदाहं मन्ये तद्ब्रह्म मा हं पौत्रमघं निगां॥१ यत्ते पृथिव्या अनामृतं दि
वि चंद्रमसि श्रितं॥वेदामृतस्याहं नाम माहं पौत्रमघं रिषं॥२ इंद्राग्नी शर्म यच्छ
तं प्रजायै मे प्रजापती॥यथायं न प्रमीयेत पुत्रो जनित्र्या अधि॥३॥ततउदकृशिरसमे
वमात्रेऽमारमर्पयित्वा॥वामदेव्यं गायेत्॥ ॥इति ज्योत्स्नकर्मः॥ ॥अथ चंद्रदर्श
नं॥ ॥अथ ऋतुसंवत्सरं यावद्वा द्वेस्तु कृष्णपक्षद्वादशतेषु द्वितीयायां प्रथमप्रयोगे
२ वै मातृक्षजाद्वैकमाभ्युदयिकं कृत्वा। सोमाभिमुखः प्रवासे वा गृहे वा शुचौ दे कर्मान्तर॥
शे पुष्पचंदनाक्षतमिश्रेणोदकेनांजलिं पूरयित्वा पितोपतिष्ठते पामंजलिं ५५॥

हरयित्वा अभिमुखश्चंद्रमसी॥ अनेन। दक्षोसं॰ अनु ष्टु प्॰ चंद्रो दे॰ चंद्रोपस्थाने वि॰॥
ईयदस्यंद्रमसि कृष्णं पृथिव्या हृदयं श्रितं॥ तदहं विद्वांस्तत्पश्यन्माहं पौ
त्रमघं रुदं॥ १ सकृद्यजुषा द्विस्तूष्णीमुत्सृज्य॥ एवं द्वादशवारं कृत्वा॥ अंज
लिं द्द्यु॥ एवं द्वादशसु द्वितीयासु कुमार निरपेक्षः पितैव कुर्यादत्रे सर्वत्र वा
मदेव्यगानं केचिदेकस्यां द्वितीयायां द्वादशांजलिन्मंत्रेणोत्सृज्य द्विस्तूष्णीमु
त्सृज्यंतीति॥ ॥इति चंद्रदर्शनं॥ ॥अथ नामकरणं॥ जननाद्दशरात्रे व्युष्टे श
तरात्रे संवत्सरे वा नामधेयकरणं॥ मनुः॥ नामधेयं दशम्यां तु द्वादश्यां वास्य
कारयेत्॥ पुण्ये तिथिमुहूर्त्ते वा नक्षत्रे वा गुणान्वित इति॥ यद्वा सर्वत्र स्यैव प्रश

स्तत्रासः ॥ तदा एव ब्राह्मण एव दिने कुर्यात् ॥ तत्र हुतमात्रे प्रजाश्चर्वं ब्रह्माभ्यूह्य दयितं हुत्वा ॥
कर्त्ताग्निमुपसमाधाय ॥ पार्थिवमग्निमावाह्य ॥ पश्चादग्नेरुदगग्रेषु दर्भेषु ॥ प्राङ्मु
56 ख उपविश्य दक्षिणतः स्थितायाः कुमारमातुः शुचिवस्त्रावृतं कुमारमुदक्शिरसम
र्पयन्त्याः सकाशाद्गृहीत्वोत्सङ्गे निधायानुपृष्ठं कर्त्तारं परिक्रम्योदगग्रे
षु दर्भेषू त्तरतः कुमारमातर्युपविष्टायां गृहीत्वा कुमार एवं कर्त्ता व्याहृतीर्जुत्वा ॥ २ ॥
अथ जुहोति ॥ नामकरणकालातिक्रमनिमित्तं प्रायश्चित्तमहं करिष्ये ॥ ॐ भूः स्वाहा ॥
व्याहृति ४ ॥ अथ माता शुचिना वसनेन कुमारमाच्छाद्य दक्षिणत ऊर्ध्वं कर्त्रे प्रयच्छतु कर्मान्तर ॥
दक्शिरसमनुपृष्ठं परिक्रम्योत्तरत उपविश्य स्फ्यदगग्रेष्वेव दर्भेषु ॥ अथ जुहोति ॥ ॥ पर्द ॥
ततो माता शुचिना वस्त्रेण कुमारमाच्छाद्य भर्त्तुर्दक्षिणतः स्थित्वा उत्तरशिरसं कुमारं पित्रे समर्पयति ॥ ततो माता
भर्त्तुः पृष्ठदेशेनोत्तरस्यां दिशि गत्वा भर्त्तुर्वामपार्श्वे उत्तराग्रेषु कुशेषु प्राङ्मुखी उपविशति ॥

।।आज्येनहोमः।।ॐप्रजापतयेस्वाहा।।इतिसहस्राहुतिंदत्वा।।कुमारस्यजन्मतिथिदे

२होमं वताजन्मनक्षत्रदेवताहोमंचकुर्यात्।।यदिप्रतिप[illegible]दिजातस्तदा।।ॐप्रतिपदे

स्वाहा।ब्रह्मणेस्वाहा।यदिद्वितीयायांजातस्तदा।ॐद्वितीयायैस्वाहा।ॐत्वष्ट्रेस्वाहा।।

विष्णवे॰ तृतीयायै॰ जनार्दनाय॰ चतुर्थ्यै॰ यमाय॰ पंचम्यै॰ सोमाय॰ षष्ठ्यै॰ कुमाराय॰ सप्त

म्यै॰ मुनिभ्यः॰ अष्टम्यै॰ वसुभ्यः॰ नवम्यै॰ पिशाचेभ्यः॰ दशम्यै॰ धर्माय॰ एका

हरये॰ दश्यै॰ रुद्रेभ्यः॰ द्वादश्यै॰ रविभ्यः॰ त्रयोदश्यै॰ विरूपाक्षाय॰ चतुर्दश्यै॰ यक्षाय॰ कामाय॰

पौर्णमास्यै पंचदश्यै॰ विश्वेभ्योदेवेभ्यः॰ अमावास्यायै॰ ॐपितृभ्यः॰।।इतिप्रतिपदादिति ।।

थिदेवताहोमः।।अथनक्षत्रदेवताहोमः।।अश्विन्यैस्वाहा।।अश्विनीकुमाराभ्यांस्वाहा।।

57

भरण्यै स्वाहा॥ यमाय० कृत्तिकाभ्यः० अग्नये० रोहिणीभ्यः० प्रजापतये० मृगशिर
से० सोमाय० आर्द्रायै० रुद्राय० पुनर्वसवे० अदितये० पुष्यायै० बृहस्पतये० अश्ले
षाभ्यः० सर्पेभ्यः० मघाभ्यः० पितृभ्यः० पूर्वाफाल्गुनीभ्यः० भगाय० उत्तराफाल्गुनी
भ्यः० अर्यमभ्यः० हस्ताभ्यः० सवितृभ्यः० चित्रायै० त्वष्ट्रे० स्वात्यै० वायवे० विशा
खाभ्यः० इंद्राग्नीभ्यां० अनुराधाभ्यः० मित्राय० ज्येष्ठायै० इंद्राय० मूलाय० निर्ऋत
आपाय० ये० पूर्वाषाढाभ्यः० अद्भ्यः० उत्तराषाढाभ्यः० विश्वेभ्यो देवेभ्यः० श्रवणायै० विष्णवे०
धनिष्ठायै० वसुभ्यः० शतभिखाभ्यः वरुणाभ्यः० पूर्वाभाद्रपदाभ्यः० अजैकपदे धर्मोतर
भ्यः० उत्तराभाद्रपदाभ्यः० अहिर्बुध्न्याय० रेवत्यै० पूष्णे०॥ इति नक्षत्रदेवताहोमः॥ ॥५७॥

॥रत्नमालायां॥तिथिपाश्चतुर्मुखविधात्रविष्णवोयमशीतदीधितिर्विशाषवह्नि
राः॥वसुनागधर्मशिवतिग्मरश्मयोमदनःकलिस्तदनुविश्वइत्यपि॥१॥वह्नि
र्विरंचिर्गिरिजागणेशः फणिर्विशाखोदिनकृन्महेशः॥दुर्गांतकोविश्वहरि
स्मराश्च शर्वशिशीन्वेतिपुराणदृष्टाः॥२॥तिथौहिदर्शसंज्ञके पितृनुशंत्यधीश्व
रान्॥त्रयोदशीतृतीययोस्मृतस्तुवित्तपोपरैः॥३॥नक्षत्रदेवतावेदस्यांगज्यो
तिषेप्रसिद्धः॥अग्निःप्रजापतिःसोमोरुद्रोऽदितिर्बृहस्पतिः॥०॥इति॥ततःपि
ताकुमारस्यमुखान्प्राणान्संमृशन्॥मुखनासिकाक्षिश्रोत्राणिस्पृशन्जपति॥
द्वयोरपिदक्षसं० यजुः कुमारोदे० नामवररणोवि०॥ॐवेसिवृतमोस्यषोस्यमृतोसि॥

आह स्पत्यं मासं प्रविशासौ । असावितिस्थाने गोत्र विष्णुदत्त शर्मन्निति नाम प्रयोक्तव्यं ॥
सत्वाह्ने परिददात्वहस्त्वा रात्र्यै परिददातु रात्रिस्त्वाहोरात्राभ्यां परिददात्वहोरात्रौ
58 त्वार्द्धमासेभ्यः परिदत्तामर्द्धमासास्त्वा मासेभ्यः परिददतु मासास्त्वर्तुभ्यः परि
ददत्वृतवस्त्वा संवत्सराय परिददतु संवत्सरस्त्वायुषे जरायै परिददात्वसौ । अ
सावितिस्थाने गोत्र विष्णुदत्त शर्मन्निति कुमारस्य नाम प्रयोक्तव्यं ॥ ततः पिता कुमार
स्य मातुः कर्णे अमुकशर्मायं ते पुत्र इति दक्षिणकर्णे नाम कथयित्वा ॥ कुमारस्य
२८ कर्णे अमुकशर्मासीति नाम कथयति ॥ ततो मात्रे कुमारं दत्वा ॥ नाम प्रकाशयेत् ॥ घोष कर्मान्तर ॥
वदाद्यंतरंतस्थं दीर्घाभि निष्ठानां तं कृतं नाम दध्यादेतत् तद्धितम युग्दांतं स्त्रीणां ॥ ५८ ॥

मात्रेचैवप्रथमंनामधेयमाख्यायथार्थं॥ व्याहृतिहोमादिवामदेव्यगानांतंविधिंसमा
प्यगौर्दक्षिणाब्राह्मणभोजयेदिति॥ ॥इतिनामकरणं॥ ॥अथवर्षग ः॥ ॥अथ
कुमारस्यजन्मतिथौ॥ कुमारस्यमासिमासिसंवत्सरेसांवत्सरिकेषुवापर्वसु॥ व्री
त्रिर्द्वीप्राप्स्तुरण्याषाढ्यांपौर्णमासिपर्वसु॥ स्कन्दंपौष्टिवृन्दंमंजर्याद॥ तत्रप्रथमगो
मात्रजननींदीसुखंकृत्वा॥ अग्निमुपसमाधाय॥ बलदनामानमग्निमावाह्य॥
व्याहृतित्रयहोमः॥ कालातिक्रमः॥ प्रायश्चित्तं॥ भूःस्वाहा॥ व्याहृति ४॥ ततःअग्नीन्द्रा
भ्यांस्वाहा॥ द्यावापृथिवीभ्यांस्वाहा॥ विश्वेभ्योदेवेभ्यःस्वाहा॥ इत्याज्याहुतित्रयंदद्यात्॥
इष्टातिथिः॥ जन्मसमयेयत्तिथिः॥ इष्टनक्षत्र॥ जन्मसमयेयंनक्षत्रः॥ जन्मपत्रीवि

59

सोक्षसेमयेत्॥नामव्वरण विपर्यीयेण॥इष्टातिथिं॥तद्देवतायै।इष्टनक्षत्रंतद्देवतायै॥
प्रथमंतिथिदेवतायैततस्तिथये॥ततोनक्षत्रदेवतायै॥पश्चात्नक्षत्रहोमः॥यदिप्र
तिपदिजातस्तदा॥ब्रह्मणेस्वाहा॥प्रतिपदेस्वाहा॥यद्यश्विन्यांजातस्तदा।अश्विनीकु
माराभ्यांस्वाहा॥अश्विन्येस्वाहा॥इत्याज्याहुतिंजुहुयात्॥एवमन्यदूहनीयमिति॥प्र
त्यब्दंश्वंलिखितंचेत्॥ततोव्याहृतिहोमादिवामदेव्यगानांतंकर्मसमापनंकुर्यादिति॥
॥इतिवर्सगंठिः॥ ॥अथप्रवासादागतः॥पितास्वपितृत्वेजनंकृजानतउपनीतवापुत्र
स्यस्वहस्ताभ्यांमूर्द्धानंपरिगृह्यमंत्रत्रयंजपेत्॥कुमारस्य॥उभाभ्यांपाणिभ्यांमूर्द्धा वृर्मांतर॥
नंपरिगृह्यजपेत्॥मंत्र॥त्रयाणामपिहृदासं०अनुष्टुप्०कुमारोदे०हस्ताभ्यांमूर्द्धानं ॥५९॥

परिग्रह्य जपेद्वि०॥ ॐ अंगादंगात्सं०भवसि हृदयादधि जायसे॥ प्राणं ते प्राणेन संदधा
मि जीवसे यावदायुषं॥ अंगादंगात्संभवसि हृदयादधि जायसे॥ वेदो वै पुत्रनामासि स
जीव शरदः शतं॥ अश्मा भव परशुर्भव हिरण्यमस्तृतं भव॥ आत्मासि पुत्र मामृथाः
स जीव शरदः शतं॥ [illegible]॥३॥ ततो मूर्द्धानमाजिघ्रनेन॥ दक्षक० यजुः कुमारो हि०
पुत्रमूर्द्ध घ्राणे वि०॥ ॐ पशूनां त्वा हिंकारेणाजिघ्राम्यसौ॥ असावितिस्थाने गोत्र वि
ष्णुदत्तशर्मन्॥ कुमारस्य मस्तकं पशुवद्धिंकारं कृत्वा॥ आघ्राणं कुर्वन्॥ दक्षिणे माता च
कुर्यात्॥ एवं दुहितुरपि दक्षिणे॥ एतच्च सप्ताकृतिः होमादि कर्म पौष्टिकं न तु संस्कारमिति॥
वामदेव्यगानान्तं कर्म समाप्तं॥ इति प्रवासविधिः॥ ॥ अथान्नप्राशनं॥ आद्यान्नप्राशने

पूर्वासा पौर्द्धा वरुणो यमः॥ नक्षत्रे च परित्याज्या वारे भौमार्कनंदनौ॥२ द्वादशी सप्तमी रि
क्ता पर्वनंदा च वर्जिताः॥ लग्नेषु चरु षोऽत्याज्यो वृषः कन्या च मन्मथः॥२ शुक्लपक्षः शुभो यो
गः संग्राह्यः शुभचंद्रमाः॥ मासो षष्ठोऽष्टमो पुंसां स्त्रीणां मासस्तु पंचमः॥३ अत्र चरुद्रुमः॥
60 एवं तंत्रेणो वा॥ पृथक्वा॥ तदा स्थंडिले पंचभूसंस्कारादि ब्रह्मोपवेशनांतं कृत्वा॥ स्थंडस्त
रणं॥ निर्वापः॥ प्राणाय त्वा जुष्टं नि०॥ अपानाय त्वा जु० चक्षुषे त्वा० श्रोत्राय त्वा जु०॥ द्विः
स्तृत्वा॥ चरुद्रुमेण चरुश्रपणं॥ उदगुद्वासनं॥ सर्वतस्तरणं॥ इध्माधानं॥ पवित्रोत्पा
दनादि आज्यसंस्करणं॥ आज्यभागांतं कृत्वा॥ आज्याहुतीद्वयं जुहुयात्॥ ॐ देवीं धूमीतर॥
वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति॥ सा नो मंद्रेषमूर्जं दुहाना धेनुर्वाग ॥६०॥

स्मानुपसुष्टुतैउ स्वाहा॥१वाजो नो अद्य प्रसुवाति दानं वाजो देवाँऽऋतुभिः कल्पयाति॥वा
जो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयं स्वाहा॥२ प्रधानहोमः॥चतुर्ग्र
हीतं स्रुच्याहृत्वा होमयेत॥प्राणेनान्नमशीय स्वाहा॥अपानेन गंधानशीय०॥चक्षुषा
रूपाण्यशीय०॥श्रोत्रेण यशो यशीय स्वाहा॥४॥देवींवाचमजनयंत०॥१वाजो नो अद्य०॥२॥
वृश्चिकस्याद्धोमो वक्तव्यः॥प्रायश्चित्तं४स्विष्टकृत॥व्याहृति होमादि वामदेव्यांतं स
माप्य॥कर्मसमापनं॥ ॥सामगस्य स्वशाखोक्तान्नप्राशनविधिः॥तत्र वृश्चिकद्विप्र
तिपत्तिवद्ति॥ज्ञातकर्मणि यद्व्रीहियवयोरसदानं॥तद्देवान्नप्राशनं॥अहुत्वादन्य
त्रहि॥प्राशनेतु वृश्चिक स्तथेति गृह्यसंग्रहे णाग्नेः पृथक्कृयवान्॥गौतमेपि गर्भाधानादि

61

संस्कारांगत्वमेण पृथगेवांनप्राशनमस्ति॥ तस्मान्नाये कृते तत्र शुभेऽहनि चंद्रावलोपेते मंत्रा १
दिने शुभनक्षत्रे प्रातरेवंस्नानादिकं विधाय मातृपूजापूर्वकं आभ्युदयिकं कृत्वा॥ स्थ
ण्डिलए पूर्ववदग्निप्रणीवास्तु चिनाग्नमग्नेऽवाहय॥ तिसभिव्याहृतीर्हुत्वा॥ पंचभि भि ३
मंत्रैः पंचाज्याहुतीर्जुहुयात्॥ तस्य प्रजापतिऋ० गायत्री० आदित्यो दे० पुरुषाधि
पत्यकामस्य चतुष्पथेऽग्नावादित्याभिमुखस्याज्यहोमे विनियोगः॥ ॐ अंनं वा एव व्रखं
३६ दस्यमंनऽघेवृंभ्रं तेभ्यस्त्वैयतिस्वाहा॥१ प्रजापति० यजुः आदित्यो दे० पुरुषाधि०
स्याज्यहोमे वि०॥ ॐ श्रीर्वा एषा यस्सत्वानो विरोचनो मयि सत्त्वमवदधातु स्वाहा॥२ वर्मांतरा॥
प्रजा० बृहती० आदित्यो० पुरुषाधि० स्याज्यहोमे वि०॥ ॐ अंनस्य घृतमेव रसस्तेजः ॥ द १॥

संपत्कामो जुहोमि स्वाहा॥३॥प्रजापति॰ यजुः क्षुद्देवता॥ क्षुत्पिपासाविच्छित्तिकामस्य सायं प्रा
तः क्षुद्धोमे वि॰॥ॐ क्षुधे स्वाहा॥ प्रजा॰ यजुः क्षुत्पिपासे देवते॥ क्षुत्पिपासाविच्छित्तिकामस्य
सायं प्रातः क्षुत्तृड्ढोमे विनियोगः॥ॐ क्षुत्पिपासाभ्यां स्वाहा॥ ततः प्राणादिपंचाज्या
हुतीर्जुहुयात्॥ॐ प्राणाय स्वाहा॥ अपानाय स्वाहा॥ व्यानाय स्वाहा॥ समानाय स्वाहा॥
उदानाय स्वाहा॥५॥ व्याहृतिहोमादि वामदेव्यगानांतं कृत्वा॥ सर्वमंत्रमेव हुत्वा॥ सु
वर्णादिनाज्यं कुमारस्य मुखे दद्यात्॥ अनेन॥ दद्ध्य॰ यजुः अन्नं देवता॥ सुवर्णाज्या
न्नप्राशने वि॰॥ॐ इ यमाज्ञेदमंन्नमिदमायुरिदममृतं॥ प्रजापति॰ बृहती॰ अं
नपतिर्दे॰॥ अंनप्राशने वि॰॥ अंनपतेन्नस्य नो धेह्यनमीवस्य शुष्मिणः॥ प्रदातारं

62

तार्क्ष्य ऊर्ज्जं नो धेहि द्विपदे शं चतुष्पदे विश्वकर्मणे स्वाहा॥ प्राणाय स्वाहा॥ २ अपानाय स्वाहा॥
व्यानाय॰ समानाय॰ उदानाय॰॥ ततो ब्राह्मणभोजनं दक्षिणादानमिति॥ इति अन्नप्रा
शनः॥ ॥अथ चूडाकरणं॥ ॥चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः॥ प्रथमेऽब्दे तृती
ये वा कर्त्तव्यं विधिनोदितं॥१॥ अथातस्तृतीये वर्षे चूडाकरणं॥ तत्र पूर्वेद्युः जटाधिवा
सनं कर्त्तव्यं॥ नागराणां विशेषः॥ रात्रौ माणवकस्य तैलेन कुंकुमेन कृत्वा रञ्जयेत्॥
गणेशांबिकयोः पूजनं॥ कपुच्छलायां किंचिद्बोहं बंधनं॥ अभिषेक आशीर्वादः॥
॥एवं॥ अथो प्रातर्मलस्नानं॥ संध्यातर्पणं॥ वैश्वदेव मातृपूजा वसोर्धारा वृद्धिश्राद्धं॥ कर्मांतर॥
॥०॥ जन्मतस्तृतीये वर्षे उदगयनपुण्यविधिना कुत्रवारलग्नादियुक्तदिनस्य ॥६२॥

पूर्वेद्युस्सायंसमये मंगलसमेतं कुसुमस्रक्सुगंधिसहितरक्तसूत्रेणोरखेन
नामध्वस्ताग्रदक्षिणहस्तिकात्रयं वध्नीयात् ॥ ॐ वसुश्रीवासि ॥ ॐ वसुपुत्रासि ॥ ॐ
वसुश्रीवासि ॥ हस्तिकात्रिग्रीवापस्थाङ्गगोत्र ॥ ततः प्रातरेव व्रतो सुस्नातः कृत
मातृपू जननान्दीमुखश्राद्धः ॥ पुरस्तात्सोष्ठायाउपलिप्ते भ्रमेउल्लप्रदेशेग्निमुप
समाधाय आज्यतंत्रन्यायेन कु शंडिकां कुर्यात् ॥ स्तरणस्रुवं बर्हिर्ध्माज्यं आज्य
स्थालीसमिद्वयसंमार्गकुशस्रुवानुगुप्तजलपूर्णपात्रक्रमेणोत्तरतः प्रांचं प्रांच
मासादयेत् ॥ अग्नेर्दक्षिणतः उदगग्राणि एव विंशतिर्दर्भपिंजुलीसप्तसप्तभिरे
कीकृत्य कुशांतरेण वेष्टिता पिंजुलीत्रयं उष्णोदकपूर्णकांस्यपात्रं ताम्रमयं चतुरं

63

४वङ्के: पूर्वतो

तदभावे चादर्शवाल्लुरहस्तं चनापितमित्येतान् प्रत्यक्संस्थान्युपकल्पयेत्॥ अग्नेरुत्त
रतः आनडुहगोमयं कृशरस्थालीपाकं वृथापक्वमित्येतान् प्राक्संस्थान्युपकल्पयेत्॥
वृथापक्वानि निर्वापरहितत्वी व्रीहियवैस्तिलैर्माषैश्च प्रत्येकं चत्वारि पात्राणि पूर
यित्वा यथाक्रमं दक्षिणसंस्थानि मंगलार्थमुपकल्पयेत्॥ ततो माता कुमारं शुचि
नावस्त्रेणाच्छाद्य क्रोडे निधाय अग्नेः पश्चिमतो भर्तुर्वामपार्श्वे उत्तराग्रेषु कुशेषु प्रा
ङ्मुखी उपविशति॥ ततः प्राङ्मुखः कर्त्तास्तरणादि विरूपाक्षजपसमित्प्रक्षे
पान्तं कृत्वा सभ्यनामाग्नेमग्निमावाह्य॥ व्याहृतिभिर्हुत्वा॥३॥ कालातिक्रमनिमि कर्मान्तर॥
त्तं प्रायश्चित्तं। भूः स्वाहा व्याहृतिः४॥ पश्चात्साङ्गपतिष्ठते॥ सवितारं मनसा ध्यायं ॥६३॥

क्षुरहस्तं च नापितं प्रेक्षमाणो जपेदनेन। दक्ष० यजुः सविता दे० कृष्णक्षुरेण क्षुरप्रेक्ष
णे वि०॥ आयमगात्सविता क्षुरेण॥ ततो वायुं मनसा ध्यायं कांस्यपात्रस्थमुष्णोदकं
पश्यान् जपेदनेन। दक्ष० यजुः वायुर्दे० उष्णोदकप्रेक्षणे वि०॥ उष्णेन वाय उदके
४ नेधि॥ ततः कांस्यपात्रस्थितोष्णा अपो दक्षिणेन पाणिना गृहीत्वा दक्षिणां जूटिकां
पुष्टिकृतां संश्रां भङ्गाय सर्वदिनं प्रदोषे रक्षासूत्रे बद्धा मासिंचेत्॥ अनेन दक्ष० एक
पदा गायत्री० आपो दे० कृष्णपुष्टिकृतासेके दने वि०॥ आप उन्दन्तु जीवसे॥ ततस्ताम्रं क्षुरमा
दर्शवा प्रेक्षमाणो जपेदनेन॥ दक्ष० यजुः विष्णुर्दे०॥ क्षुरादर्शप्रेक्षणे वि०॥ विष्णोर्दं
ष्ट्रोसि॥ ततः सप्त दर्भपिंजुलीः शिरोभिमुखाग्र ऊर्ध्वमूलाः कृष्णपुष्टिकृयानिदध्यात्॥ १ दक्षिण

॥दक्ष० यजुः उँ षधीर्दे० दर्भपिंजुली निधाने वि०॥ उँ षधे त्रायस्वैनं॥ ततो वामहस्तेन कू
पुल्लिकूया सह दर्भपिंजूली धृत्वा॥ दक्षिणपाणिगृहीतेन ताम्रक्षुरेण दर्शनेन वा नि
दध्मादनेन। दक्ष० यजुः स्वधिति दे० कूपुल्लिकायां ताम्रक्षुरस्यादर्शस्य वा निधाने वि०॥
64 ॥स्वधिते मैनं हिं० सीः॥ ततः कूशच्छेदो यथा न भवति तथा ताम्रक्षुरमादर्शं वा तत्रै
व कूपुल्लिकादेशे अनेन मंत्रेण प्राङ्मुखं सह घजुषा द्विस्तूष्णीं प्रेरयेत्॥ दक्ष० यजुः
हृषा दे० ताम्रक्षुरस्यादर्शवा प्रेरणे वि०॥ उँ येन श्रषा बृहस्पतेर्वायोरिंद्रस्य चावपत्॥
तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्च्चसे॥ ततो क्षौरक्षुरेण कू
पुल्लिकादेशास्थितं कूशं छित्वा दर्भपिंजूलीभिः सह चाचारतो वा क्षमित्र विधृत पात्र कूर्मांतरा॥
स्थं वृषगोमये निक्षिपेत्॥ ॥६४॥

त्रिः प्रांचं प्रोहति॥ सह घजुषा द्विस्तूष्णीं केशच्छेदन मऊ वन्द॥२

॥ अथ कवचादिक्षोपरि द्वितीयजूटिकायां पुच्छसंज्ञायां आपउं
दं उजीवस इत्यादिमंत्रैः छेदनादिविधानमारभ्य त्रुटिछेदन गोमयनिधानपर्यंतं कर्म
पुनः सर्वं कृत्वा ॥ तदुत्तरस्यां तृतीयजूटिकायां पुच्छिकाख्यायामेवं कृते छेद
नादिगोमयनिधानपर्यंतं सर्वं तत्पुनरपि कुर्यात् ॥ एवं त्रिः ॥ सर्वं पुच्छा
लक्ष्मीमेव ॥ वाससा परिधाय ॥
॥ उभाभ्यां पाणिभ्यां मूर्द्धानं परिगृह्य जपेदनेन ॥ दक्षः ० उष्णिक् ० जमदग्नि
कश्यपागस्त्यादयो देवता ० ॥ हस्तद्वयेन कुमारस्य मूर्द्धानं परिगृह्य जपे वि ० ॥ ॐ त्र्या
युषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्नोऽस्तु त्र्यायुषं ॥

स्त्रियास्तूष्णीं॥ ततस्तेनैव नापितेनाग्नेरुत्तरतः किंचि[illegible]दुत्तरेण कुलगोत्राचारानुसारे
तदह भोजयंति णमुंडनं जूटं वा कारयेत्॥ अशली कारयंति। क्षुरं नापिताय दद्यात्॥ सर्वमेव के
२ शं वृष[illegible] गोमयोपरि निधाय अरण्ये निखनेत्॥ वंशविटपे वा स्थापयेत्॥ एतच्चायम
65 गादित्यादि मंत्रा घ्रात्वा वर्जयेयुः स्त्रियामपि कुर्यात्॥ होमां[illegible]गमंत्रेष्वभेवं स्येति॥
ततः प्रायश्चित्तार्थं व्याहृतिहोमादि गोदक्षिणां वामदेव्यगानांतं विधिं समापयेत्॥
ततः केशन्यारण्य भूमि निखननं तृणगच्छ ग्रामाछिन्नां नादौ पथाष्ववनि धेयः॥ हारं ३
कृशरं व्रीहियवादेवं च चौरकर्म नापितायुर्दद्यात्॥ ॥इति चूडाकरणसमाप्ती॥ ॥ कर्मातरा॥
॥अथोपनयनं॥ ॥गर्भाष्टमेषु ब्राह्मणमुपयैनेन्द्रं कैकादशेषु क्षत्रियं गर्भद्वादशेषु ॥दु५॥

वैश्यमाषोडशाद्वर्षाब्राह्मणस्यानतीतः व्रात्सोभवति॥०॥ तत्रगर्भाष्टमवर्षेऽष्टमे दैवज्ञकथि
तेचंद्रतारानुकूलेशुभेऽह्नि प्रातःस्नानादिकं निर्वर्त्य मातृपूजाद्यर्वकमाभ्युदयि
कं विधना॥ ततः माणवकस्य सशिखवपनं॥ स्नानं मांगल्यं भोजनंच आभरणैरलंका
रंकृत्वा एवंकृश्वित्कारयित्वा॥ ऊर्द्ध्वं पतितसावित्रीका भवंति नैनानुपनयेयुः॥ यदापू
यकृतदावृद्धिश्राद्धादिकं कर्तव्यं॥ एवं तंत्रेण तु न वा॥ स्नानं वस्त्रालंकारादिकुर्यात्॥ क्षौ
मं॰ शाणं वा वसनं ब्राह्मणस्य कार्पासं क्षत्रियस्याविकं वैश्यस्य सर्वाणि वा सर्वेषां॥
ततः आचार्यो मंडपमध्ये अग्निप्रणीय ब्राह्मणमुपवेश्य॥ अग्नेरुत्तरतः पात्राण्यासाद
यति॥ तद्यथा॥ कुशबर्हिरिध्म आज्य आज्यस्थाली समिद्वयं संमार्गकुशाः स्रुव अग्रे

गुप्तो दद्वेभव सुयज्ञोपवीतमेखलादंडं अजिन भिक्षापात्र शर्मपात्रमिति॥ ततो माणवकं
महतवाससः परिधाप्य कुंडलादिना मलंकारं कृत्वा॥ आचार्य दक्षिणतः उदग्र कुशो गर
त्तरे आसने उपवेशयेत्॥ ततो भूर्जपादि विरूपाक्षांतं कृत्वा समुद्भवमग्निमावाह्य॥
ततः आचार्य माणवकं यज्ञोपवीत परिधापयेत्॥ ६॥ गृह्यासंग्रहः॥ अजिनं सर्वदैव
त्यमैंडो दंड इतिस्मृतः॥ सावित्रीमेखलामाकुस्तस्मात्सर्वाणि धारयेत्॥१ मेखला
लामजिनं दंडमुपवीतं कमंडलुं॥ अप्सु प्राश्य विनष्टानि गृह्णीतान्यानि मंत्रतः॥२॥
यज्ञोपवीतं कुर्वीत सूत्रेण नवतंतवः॥ देवतास्तत्र वक्ष्यामि आनुपूर्वेण याः स्मृताः॥३
ॐकारः प्रथमस्तंतु द्वितीयश्चाग्निदैवतः॥ तृतीयो नागदेवस्य चतुर्थः सोमदैवतः॥४॥ धर्मांतर॥

पंचमः पितृदेवत्यः षष्ठश्चैव प्रजापतिः॥ सप्तमो वायुदेवत्सोऽष्टमो यमदैवतः॥ प॥
नमेवः सर्वदेवत्य इत्येतेन वतंतवः॥ द्विगुणं त्रिगुणं वापि एवं ग्रंथिकृतं विदुः॥ ६
वृनैवोत्पादितं सूत्रं वृनवान्त्रिगुणीकृतं॥ वृनवास्यकृतो ग्रंथिर्वृनमंत्रेणमंत्रितं॥ ७
ब्रह्मणोत्पादितं सूत्रं विष्णुना त्रिगुणीकृतं॥ रुद्रेणतु कृतो ग्रंथिः सावित्र्यात्वभिमं
त्रितं॥ ८॥ स्तनादूर्ध्वं मधश्चेनाभेर्न कर्तव्यं कथंचन॥ स्तनादूर्ध्वं स्त्रियः हंति नाभ्य
धस्तात्तपक्षयः॥ ९॥ मा णवकं पठितेन मंत्रेण॥ प्रजापत्तिः यजुः उपवीतं दे०॥
यज्ञोपवीतपरिधाने वि०॥ परशा स्वाहा॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं
पुरस्तात्॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥ यज्ञोपवीतमसि

३ ६. समिद्धं॥

यज्ञस्यत्वा उपवीतेनोपनह्यामि॥ आचमनं॥ द्वौ मतौ कृष्णमृग गौरमृग॥ ततोऽजिनमुत्तरी
यपरिधापयेदनेन॥ दक्ष० यजुः अजिनंदे०॥ उत्तरीयाऽजिनं परिधापने वि०॥ ॐ मित्रस्य
चक्षुर्धरुणं बलिष्टियस्ते जो यशस्वी स्थवीरं॥ अनाहनस्यं वसनंजैरिष्णुः परिदंवाज्य
जिनंदधेयी॥ ततो माणवकं त्रिराचामेत्॥ अथ पंचसु मंत्रेषु आचार्यस्तु वेदो
पहत्यापहत्य पंचाज्याहुती र्जुहुयात्॥ माणवकं पठितैर्मंत्रैः॥ पंचसु मंत्रेषु दक्ष०य
जुः अग्निवायुःसूर्यचंद्रव्रतपति र्दे०॥ आज्यहोमे वि०॥ ॐ अग्ने व्रतपते व्रतंचरिष्यामि
तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा॥ ॐ वायो व्रतप
ते व्रतंचरिष्यामि०॥ सूर्य व्रतपते व्रतंचरिष्यामि०॥ चंद्र व्रतपते व्रतंचरिष्यामि०॥ ४॥
व्रतानां व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासमिदमहमनृतात्स
त्यमुपैमि स्वाहा॥ ५॥

अथवार्षिकं सावित्रव्रतंचरिष्यामि कर्मांतरं॥

॥ ६७॥

व्याहृतीनां छंदार्षदैवतं पूर्ववत्॥ ॐ भूः स्वाहा॥ भुवः स्वाहा॥ स्वः स्वाहा॥ भूर्भुवः स्वः स्वाहा॥ ४॥
ततः आचार्य अग्नेः पश्चाद् उदगग्रेषु दर्भेषु प्राङ्मुखो वतिष्ठते॥ अग्न वर्ययोमध्ये मा
णवकः कृतांजलि उदगग्रेषु दर्भेषु प्रत्यङ्मुखस्तिष्ठेत्॥ माणवक दक्षिणस्यां दिशि
अध्ययनयुक्तो ब्राह्मण उदङ्मुखः स्थित्वा॥ अद्भिर्माणवकस्यांजलिं पूरयति॥ ततो
माणवकांजलिरुपरि आचार्यांजलिं पूरयेत्॥ आचार्यमाणवकौ प्रेक्षमाणो जपति॥ ०॥
अग्नि आचार्यमध्ये माणवकस्तिष्ठति॥ माणवकोंजलिं कृतोऽभिमुख आचार्यमुद
गग्रेषु दर्भेषु॥ तस्य दक्षिणतोवस्थाय॥ मैत्रवान्ब्राह्मणो पामंजलिं पूरयति॥ उपरि
ष्टाच्चाचार्यस्य प्रेक्षमाणो जपति॥ अस्यार्थः॥ आचार्येनी अंजलिउपरिमाणवकनी

68

अंजलीमूर्द्धे॥ एवं ब्राह्मणदक्षिणस्कंधोदकेनांजलिं पूरयेत्॥ जोतोथको भणो॥ ७॥ दक्ष०
न चूदनुष्टुप्यजुत्तरार्द्धो निचृत्पंक्तिछंदः॥ माणवको दे०॥ उपनयने आचार्यस्य माणव
कप्रेक्षणस्य जपे वि०॥ ॐ आगंत्रा समगन्महि प्र सु मर्त्यं युयोतन॥ अरिष्टाः संचरे
महि स्वस्ति चरतादयं॥ अग्निष्टे हस्तमग्रहीत्सविता हस्तमग्रहीदर्यमा हस्तमग्र
हीन्मित्रस्त्वमसि कर्मणाग्निराचार्यस्तव॥ २॥ ततः आचार्यो माणवकं वाचयेदनेन॥
दक्ष० स्वनुष्टुप्० आचार्यो दे०॥ माणवक वाचने वि०॥ ॐ ब्रह्मचर्यमागामुपमानयस्व॥
ततः आचार्यो माणवकं नामधेयं पृच्छति॥ दक्ष० यजुः माणवको दे०॥ माणवक प्रश्ने वि० नाम २ कर्मांतर॥
॥ ॐ को नामासि॥ अथ माणवकः स्वनामकथयति॥ दक्ष० यजुः माणवको दे०॥ माणव ॥ ६८ ॥

कस्यनामकथने वि०॥ गोत्र विष्णुदत्तशर्म्मनामास्मि॥ नामधेयं कथयित्वा देवताश्रयं वा नक्षत्राश्रयं वा गोत्राश्रयं॥ ततोंजलिं संत्यज्य॥ उत्सृज्यापामंजलिं॥ आचार्यो दक्षिणेन पाणिना दक्षिणं पाणिं साङ्गुष्ठं गृह्णाति॥ ततः आचार्यो दक्षिणहस्तेन माणवकदक्षिणहस्तं साङ्गुष्ठं गृहीत्वा॥ ऋष्यादि० यजुः सवितृश्चिवृष्टुप् छन्दः नोदे०॥ आचार्यस्य माणवकहस्तग्रहणे वि०॥ ॐ देवस्य ते सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसौ॥ असौ इति स्थाने गोत्र विष्णुदत्तशर्मन्॥ ततो माणवक आचार्योऽनेन मंत्रेण प्रदक्षिणेन भ्रामयित्वा प्राङ्मुखं करोति॥ तस्य ऋष्यादि० यजुः माणवको दे०॥ प्रदक्षिणमावर्तने वि०॥ ॐ सूर्यस्यावृतमन्वावर्तस्व॥ गोत्र विष्णुदत्तशर्मन्॥ अथ

अनेन मंत्रेण

69

आचार्यो दक्षिणहस्तेन माणवकस्य दक्षिणमन्वंसमन्वालभ्यान्तर्हितां नाभिमभिमृ
शेदनेन॥ दृह॰ यजुः नाभ्यंतकौ देवते माणवकनाभिस्पर्शने वि०॥ ॐ प्राणानां ग्रन्थिरसि
मा विस्रसोंतकइदं ते परिददाम्यमुं॥ अमुमिति स्थाने गोत्रं विष्णुदत्तशर्माणं॥ नाभि
देशं त्यक्त्वा॥ उदरमालभ्यं जपेदनेन॥ दृह॰ यजुः अकुरो देवता॥ उदरालभ्य जपे वि०॥
ॐ अकुर इदं ते परिददामि॥ गोत्रं विष्णुदत्तशर्माणं॥ उदरं त्यक्त्वा॥ हृदयमालभ्य ज
पेदनेन॥ दृह॰ यजुः कृशनो दे॰ हृदयालभ्य जपे वि०॥ ॐ कृशन इदं ते परिददामि॥
गोत्रं विष्णुदत्तशर्माणं॥ हृदयं त्यक्त्वा॥ ततः आचार्यो दक्षिणहस्ते माणवकदक्षिणस्कं कर्मान्तरा॥
धमालभ्य जपेदनेन॥ दृह॰ यजुः प्रजापतिर्दे॰॥ दक्षिणस्कंधस्पर्शजपे विनियोगः॥ ॥ दृ९॥

ॐ प्रजापतये त्वा परिददामि। गोत्र विष्णुदत्तशर्मन्॥ सव्येन सव्यं॥ ततो वामेन पाणिना
२ व आचार्यो माणवकस्य वामं स्कंधं स्पृशन् जपति॥ दक्ष० यजुः सविता दे० वामस्कंधस्पर्श
जपे वि०॥ देवाय त्वा सवित्रे परिददामि॥ गोत्र विष्णुदत्तशर्मन्॥ अथाचार्यो माणवकम
नेन मंत्रेण संबोधयति॥ दक्ष० यजुः ब्रह्मचारी दे०॥ उपनयने ब्रह्मचारिसंबोधने वि०॥
ॐ ब्रह्मचार्यसि॥ गोत्र विष्णुदत्तशर्मन्॥ अथ संबोधितं माणवकमाचार्यः प्रेषयति॥
प्रजापति० यजुः ब्रह्मचारी दे०॥ उपनयने ब्रह्मचारिप्रैषे वि०॥ समिधमाधेहि॥ बाढ
मिति माणवको ब्रूयात् सर्वत्र॥ अपोशान॥ बाढं॥ कर्म कुरु॥ बाढं॥ मा दिवा स्वाप्सीः॥ बाढं॥
ततोऽग्नेरुत्तरतो गत्वा आचार्यं उदगग्रेषु कुशेषु॥ प्राङ्मुख उपविशति॥ ततः माण

वद्धो ऽआचार्याभिमुखः पातितदक्षिणजान्वुदगग्रेषु कुशेषु त्यङ्मुखउपविशति॥
तथैनंमाणवकमाचार्यस्त्रिप्रदक्षिणंत्रिवृतंमुंजमेखलांपरिधापयन्मंत्रद्वयंवा
चयति॥द्वयोरपिदक्ष० त्रिष्टुप्० मेखलादे०॥मेखलापरिधापनेमाणवकवाचने वि०॥
ॐइयंदुरुक्तात्परिबाधमानावर्णंपवित्रंपुनतीमऽआगात्॥प्राणापानाभ्यांबलमा
हरंतीस्वसादेवीसुभगामेखलेयं॥ऋतस्यगोप्त्रीतपसःपरस्वीघ्नतीरक्षः सहमा
नाऽरातीः॥सामासमंतमभिपर्येहि भद्रे धर्त्तारस्तेमेखलेमारिषाम॥ऽथकृ
तांजलिनाचार्यसमीपंचउमाणवकः॥अधीहिभोःसावित्रींमेभवाननुब्रवीत्वि वूमींतर॥
त्याह॥आचार्यस्यसावित्रीमन्वाह॥आच०॥प्रयोगः॥मासेपक्षेतिथौवारेसावित्री ॥७०॥

प्रत्नान मिमिन्द्रं सरस्वत्यैः अजनमहं वृरिषे॥ सरस्वतीमृजीं कृत्वा॥ ततो वाचयेत्॥ ॐ गा
यत्र्या विश्वामित्रऋ॰ गायत्री॰ सविता दे॰॥ सावित्रीवाचने वि॰॥ प्रथमं पादं द्वितीयमर्द्ध पादं२
मर्द्धं तृतीय सर्वं॥ ॐ तत्स वितुर्वरेण्यं। ॐ भर्गो देवस्य धीमहि॥ ॐ धियो यो नः प्रचोद
यात्॥१ ॐ तत्स वितुर्वरेण्यं भर्गो देवस्य ॐ धीमहि धियो यो नः प्रचोदयात्॥२ ॐ तत्स
वितुर्वरेण्यं॰ दयात्॥३॥ अथाचार्यो माणवकं महाव्याहृतीः पृथक् कृत्वा ॐकारस्य विवा
अध्यापयेत्॥ भूर्भुवः स्वरिति व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजऋषिः॥ गायत्र्यु
ष्णिगनुष्टुप्छंदांसि अग्निर्वायुरादित्यो दे॰॥ महाव्याहृतिवाचने वि॰॥ ॐ भूरोम्। ॐ भुव
रोम्। ॐ स्वरोम्। ततो बैल्वं पालाशं वा माणवकपरिमाणं दंडं माणवकाय प्रयच्छंनामा

१वा यीमाणवकंवाचयति॥ प्रजापति॰ पंक्तिश्छंदः॥ दंडाग्नी देवते। उपनयने माणवक दंडार्पणे वि॰॥
ॐ सुश्रवः सुश्रवसं मा कुरु यथा त्वं सुश्रवः सुश्रवा देवेष्वेवमहं सुश्रवः सुश्रवा
ब्राह्मणेषु भूयासं॥ पाठः॥ अजिनं प्रयच्छति ऐणेयरौरवाजिनान्यजिनानि॥ कृष्णमृ
गः। गौरमृगः॥ अजा॥ होमतौ॥ मित्रस्यचक्षुर्द्धरुणं॰॥ व्रत॥ अथाचार्याधीनो भवान्य
त्रा धर्मचरणात्॥ बाढमिति सर्वत्र॥ क्रोधानृते वर्जय॥ मैथुनं वर्जय॥ उपरिशय्यां वर्जय॥
कौशीलवगंधांजनानि वर्जय॥ स्नानं वर्जय॥ अवलेखनदंतप्रक्षालनपादप्रक्षाल
नानि वर्जय॥ क्षुरकृत्यं वर्जय॥ मधुमांसे वर्जय॥ गोयुक्तारोहणं वर्जय॥ अंतर्ग्राम कर्मांतर॥ ॥७१॥
उपानहोर्धारणं वर्जय॥ स्वयमिंद्रियमोचनं वर्जय॥ मेखलाधारण॥ भिक्षाचर्या॥ दंडधारण॥

71

समिदाधानं॥ एतेषु प्रैषेषु बाढमिति प्रत्तिप्रैषेषु॥ ॐमित्ति च॥ उदकोपस्पर्शनं॥ प्रातरभिवा
नार दाइत्येते नित्यधर्माः॥ गोदानिव्रत॥ आदित्यव्रत॥ उपनिषद्व्रत॥ ज्येष्ठसामव्रत॥ सं
वत्सरास्तेषां॥ आचरति॥ ततः स्थूली आदित्योपस्थानं अग्निप्रदक्षिणीकृत्वा॥ ७॥ ॥
अथ गृहीतदंडो ब्रह्मचारी भिक्षां प्रार्थयति॥ तत्र प्रथमं मातरमेव प्रार्थयेत्॥ ॐ भवति
भिक्षां देहीति उद्बुभिक्षः सर्वत्र स्वस्तीति ब्रूयात्॥ तथा मातृबंधुस्त्रियः॥ ततः पितरं
भवन्भिक्षां देहीति प्रार्थयेत्॥ ततोन्यांश्च प्रार्थयेत्॥ उद्बुध भैक्ष्यमाचार्यायनिवेदयेत्॥
आचार्यदत्तं प्रतिगृह्णीयात्॥ ततः प्रायश्चित्तादि गोदक्षिणी वामदेव्यगानं तंतंत्रं समा
पयेत्॥ ततो ब्रह्मचारिवाग्यतः स्तिष्टेदास्ते समयस्थः॥ अथ संध्यामुपास्य भूञ्ज

पादि त्ह्लीपरिसमूहनं परिषेचनपर्युक्षणसमिदाधानपावक्नाम्नाग्निमग्निमावाह्य॥
प्रधानसमिधंद्द्याह्। तत्रप्रादेशप्रमाणीं घृताक्तं समित्त्रयमादाय आघंतयोर्स्त्रक्ष्णीं॥
मध्ये॥ द्क्ष॰यजु: अग्निर्दे॰॥ अग्नौसमिदाधाने वि॰॥ॐ अग्नये समिधमाहार्षं बृहते
जातवेदसे। यथात्वमग्ने समिधसमिध्यस्येवमहमायुषामेधयावर्चसाप्रजया
पशुभिर्ब्रह्मवर्चसेनधनेनान्नाद्येन समेधिषीयस्वाहा॥ इतिजुहुयात्॥ सहद्वात्रिर्वा॥
ततः समिदाधानपर्युक्षणपरिषेचनअग्निप्रदक्षिणाद्दा नमुदपनिसर्वव्रतपात्र
प्रहरणानि कृत्वापूर्वोक्तमन्स्मवंदना निकृत्वा आयुरारोग्यादि अग्निप्रार्थ्याग्निमभि कर्मांतर॥
वादयेत्॥ अमुकगोत्रोहं अमुकाऽमुकप्रवरोहं अमुकशर्मा अहं भो अग्ने त्वामभिवा ॥७२॥

दयेत्॥ ततएववरुलीएवमाचार्यादीनां। विप्रेभ्यो पितामाताज्येष्ठभ्रातास्वसाद्वृद्धौ सर्वत्रा
दीनामभिवादयेत्॥ आयुष्मान्भवासौ इति प्रतिवचनं॥ ७॥ नमस्तेत्यग्निं विसृज्य॥
अतीतायां संध्यायां भिक्षालब्धमंनंक्षारलवणवर्जितं सघृतं उदङ्मुखो भूत्वा ॐ
अमृतोपस्तरणमसि स्वाहा॥ इत्यापोशानं कृत्वा मध्यमानामिकांगुष्ठत्रिपर्वाग्रैर्हीतं ॐ
प्राणाय स्वाहा॥ ॐ व्यानाय०॥ ॐ अपानाय०॥ ॐ समानाय०॥ ॐ उदानाय स्वाहा॥ पंचाहुतीर
भ्यवहृत्य वामहस्तविधृत भोजनपात्रो वाग्यतो भुंजीत॥ भोजनावसाने च॥ ॐ अमृतापि
धानमसि स्वाहा॥ इति पुनरापोशानं कृत्वा आचामेत्॥ एतच्चाग्निकार्यं समावर्तनपर्यंतं
सायंप्रातः प्रत्यहं कर्तव्यं॥ भोजनं चानेनक्रमेण यावज्जीवं कर्तव्यं॥ ७॥ ततो ब्रह्मचारी उ
पनयनादारभ्य त्रिरात्रमक्षारलवणाशी भवति॥ इति उपनयनकर्म समाप्तं॥ ७॥ ७॥ ॥

॥ अथ चतुर्थीहनि सावित्रश्चरुः॥ यत्रोपनयनीगत्वेन तत्र मातृप्रजापरिद्धिश्राद्धं च न
भवति विवाहं चतुर्थीवत्॥ अथाग्निस्थापनं॥ समिधं हुत्वा ब्राह्मणमुपवेश्य॥ अग्नेः
73 पश्चात् खण्डस्तरणीउदक्त्वं च चरुस्थालीं पवित्रमेहणीं चैत्वा॥ सुप्रक्षालितो स्रुवस्रुचु
सलेदृशहविः शूर्पं चासादयति॥ प्रोक्षति॥ अग्नेरुत्तरतोपि खण्डस्तरणोपनिउदक्
वं आज्यस्थालीं बर्हिरिध्मा विंशतिमाज्यसमिद्वयं चाहृता सं मा [illegible] शान्ते स्रुवः
स्रुचं प्रसपात्रं चासादयति प्रोक्षयति च चतुर्मु ष्टिप्यरितं व्रीहियवान्नासादयति॥
अथ माहितान् व्रीहियवान् गृहीत्वा॥ ॐ सवित्रे त्वा जुष्टं निर्वपामीति सकृं निरूप्य
द्विस्तूष्णीं निर्वपेत्॥ निर्वापस्तु प्रजापतेन तीर्थेन मुष्टिविति॥ ततस्तीडुलानुस्रुवस्रुवे दूर्मांतर॥
हुत्वा प्राङ्मुखो भूत्वोपर्यधस्थित दक्षिणवामपाणिमुसलेन किंचिदवहत्य शेष ॥७३॥

यदृच्छयाऽवहन्यात्॥ ततो विरूपीभूतेषु त्रिः कंडनं कृत्वा। त्रिः सूर्पेण त्रिः श्रया त्रिः प्रक्षा
ल्य प्रागग्रे पवित्रे चरुस्थाल्या उपरि दत्त्वा तद्धितास्तंडुलांश्चरौ निक्षिप्य कृतमेक्षणेन प्रदक्षि
णमुन्मिश्रयेत्॥ स्थालीपाकं श्रपयित्वा॥ पवित्रे दत्त्वा स्रुवेणाज्ये नाभिघार्योदगुत्तार्य
पुनः पवित्रे दत्त्वाभिघारयेत्॥ ततो भूपरिसमूहनस्तरणस्थालीपाकस्थापने ध्माध्मना पवि
त्रोत्पादनं चालनाऽसपवनात्पवनं पवित्राग्निप्रक्षेपाज्याधिश्रपणोद्गुद्वासनस्रुक्स्रु
वमेक्षणकुशप्राकृसंमार्गप्रोक्षणप्रतपनाग्निपश्चिमे ब्रवीप राज्यचर्वासादनमुदकांज
लिप्रसेकपर्युक्षणसमित्पुष्पाहुतस्तत्प्रपदविरूपाक्षजप तदन्त्र ब्रह्मण्यजनहस्तप्रत्या
वर्तनसमित्प्रक्षेपं कृत्वा॥ सूर्यनामनामग्निमावाह्य॥ चतुर्गृहीतमाज्यं पृथक् पृथक् स्रुचु

चिगृहीत्वा पंचगृहीत्वा पंचगृहीतं त्वात्॥ प्रज्वलिते ग्नावुत्तरदक्षिणयोर्भागयोः प्राच्याधू
रायाग्नेयसौम्यावाज्यभागौ चजुहुयात्॥ ॐ अग्नये स्वाहा उत्तरतः॥ ॐ सोमाय स्वाहा दक्षि
णतः॥ ततः स्थालीपाकेनाज्यं प्रसिध्य दक्षिणोत्तररेखाद्वयमेक्षणेन हुत्वा॥ स्रुवेण स्रु
चि घृतमुपस्तीर्य मध्यस्थर्वाद्धं मेक्षणेन हविरवदाय पैरावेत्तिनाउपस्थाद्भागादप्यव
दायस्रुचि निक्षिप्य स्रुवेणाज्येनाभिघार्य वेदानस्थानानि वाभिघार्य ॐ सवित्रे स्वाहेति
सकृत् त्रिर्वाग्नेर्मध्यभागे जुहुयात्॥ उपघातपक्षे स्थालीपाकाज्यं प्रसिध्य मध्यान्मे
क्षणेन हविरादाय॥ ॐ सवित्रे स्वाहेति त्रिसकृद्वा जुहुयात्॥ हुतमनभिघारयेति विशे पूर्णीतर॥
षः॥ एवं स्रुवा प्रधानाहुतिं हुत्वा पंचापि व्रतवतीर्विपरिणमंत्रैर्जुहुयात्॥ दहं॰ यजुः ॥७४॥

अग्निवायुसूर्यचंद्रव्रतपतिर्दे०॥आज्यहोमेवि०॥ॐअग्नेव्रतपतेव्रतमचारिषंअष्टवार्षिकसावित्रव्रतमचारिषं
तत्तेप्रब्रवीमितद्शकं तेनाराध्समिदमहमन्नतासत्यमुपागांस्वाहा॥१वायोव्रतपते
व्रतमचारिषंतत्तेप्रब्रवीमितद्शकं तेनाराध्समिदमहमन्नतासत्यमुपागांस्वाहा॥२॥
सूर्यव्रतपतेव्रतमचारिषंतत्तेप्रब्रवीमितद्शकं तेनाराध्समिदमहमन्नतासत्य
मुपागांस्वाहा॥३॥चंद्रव्रतपतेव्रतमचारिषंतत्तेप्रब्रवीमितद्शकं तेनाराध्समिदमह
मन्नतासत्यमुपागांस्वाहा॥४॥व्रतानांव्रतपतेव्रतमचारिषंतत्तेप्रब्रवीमितद्शकं
तेनाराध्समिदमहमन्नतासत्यमुपागांस्वाहा॥५॥ततस्तूष्णीमधस्तान्मौञ्ज्याविमोकं
दण्डस्यच अत्रमौञ्जीदण्डयज्ञोपवीतवस्त्रकृष्णाजिनानिन्यस्तानानिभवन्तिशिष्टा
चाराद्॥

75

ततोव्याहृतिचतस्रः प्रायश्चित्तार्थं हुत्वा ॥ पुनः स्रुवेण स्रुचि आज्यमुपस्तीर्य ऐशान्यां भू
यिष्ठं मेक्षणेन चरोरवदाय द्विरभिघार्य हुतमनभिघायी ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥
इत्यैशान्यां ॥ प्रधाना हुत्वा संस्रवाङ्गांन्तु कुर्यात्पश्चाच्च तत्पक्षे द्विरुपस्तरणमपि ॥ ततो
व्यस्तसमस्ताभिर्व्याहृतिभिस्तिस्र आज्याहुतीर्हुत्वा मेक्षणमग्नौ क्षिपेत् ॥ स्वयं ब्रह्म
त्वपक्षे तु नाग्नौ प्रक्षेपः ॥ किन्तु भोजनकाले प्रक्षाल्य मेक्षणी तेनैव स्थालीपाकशेषं
भुं भुंजीत ॥ ततः समित्प्रक्षेपान्तु पर्युक्षणो दक्षांजलिप्रसेचनयज्ञवास्तुकरण वसोर्धाराः
हुत्वा हविः शेषं ब्राह्मणे दत्वा पूर्णपात्रं दक्षिणां दत्वा वामदेव्यं गीत्वा समापयेत् ॥ ॥ कूर्मांतरा ॥
इति सावित्रस्वरूपः ॥ ॥ अथ ब्रह्मचारी सावित्रव्रतादिकर्मक्रम विचारः ॥ आठंम्य ब्रह्म ॥७५॥
चारीने अष्टव्रत करयी छे ते अहींयां स्परवांनथि ॥ ७ ॥ ॥७॥

॥अथ समावर्त्तनं॥ कृतवेदाध्ययनमाचार्यनुमतं माणवकं समावर्त्तयेत्॥ ॥तत्र विधिः॥
तत्र दैवज्ञनिरीक्षिते शुभे दिने प्रथमं प्रातःकृतस्नानकृतमातृपूजापूर्वकं माभ्युदयिकं कृ
त्वा॥ ततः आचार्यो मं उपमध्ये अग्निं प्रणीय ब्रह्माणमुपवेश्य अग्नेरुत्तरतः पात्राण्यासा
दयति॥ तद्यथा॥ कुशबर्हिरिध्मं आज्यस्थाली समिद्द्वयं संमार्जकुशाः स्रुवः अनुगुप्ता

दर्वी स्रुवं पात्रमिति ॥ आसादितानि पात्राण्युत्तरतः ॥ व्रीहयः शालयो मुद्गा गोधूमाः स

र्षपास्तिलाः यवाश्चेति सर्वौषधीभिः शीतोष्णाभिरद्भिः कृताद्दर्व्यादिगंधयुक्त (margin: भिर्मिश्रिता)

मुदकं पात्रांतरस्थिताभिः उपकल्पयेत् ॥ वस्त्रालंकारं चंदनस्रजउपानहौ वेणवदं

डाद्युपकल्पयेत् ॥ ततो भूजपादि विरूपाक्षांतं कृत्वा ॥ पावकाग्निमावाह्य ॥ ततः व्याहृ

तिभिर्हुत्वा ॥ ततो माणवकं दक्षिणे निधाय ॥ वा अग्ने व्रतपतेत्यादि पंचाज्याहुतीर्हुत्वा ॥

पंचसु मंत्रेषु देव० यजुः अग्निवायुसूर्यचंद्र व्रतपति दे० ॥ समावर्त्तने आज्यहोमे वि० ॥

अष्टवार्षिकसावि ॐ अग्ने व्रतपते व्रतमचारिषं तत्ते प्रब्रवीमि तदशकं तेनाराधमिदमहमनृतात्सत्यमु कमीतरा॥

त्वव्रतमचारिषं पागां स्वाहा ॥ १ एवं वायो एवं सूर्य एवं चंद्र एवं व्रतपतयः ॥ इत्याज्यहोमः ॥ ततोऽग्नेरुत्त ॥७६॥

76

१ आचार्य

रतः प्रागग्रेषु दर्भेषु उदङ्मुखः उपविशति॥ ब्रह्मचारी च आचार्यस्य सन्निधौ उदगग्रेषु कुशो
परि प्राङ्मुख उपविष्टोऽञ्जलिना गंधवदुदकं गृहीत्वा अभिमाङ्क्ष्यादनेन दह्नस्य० यजुः
अग्न्यादयो दे०॥ समावर्त्तने ब्रह्मचार्युदकांजलित्यागे वि०॥ ओं ये अप्स्वंतरग्नयः प्रविष्टा
गोह्य उपगोह्यो मयूखो मनोहाः। स्वलो विरूजस्तनूदूषिरिंद्रियहा अतिताँस्सृजामि॥
अनेन मंत्रेण भूमौ त्यजेत्॥ पुनस्तथैवोदकांजलिं गृहीत्वा॥ दह्नं० यजुः अपां घोर क्रूरा
शांतरूपा देवताः। समावर्त्तने ब्रह्मचार्युदकांजलित्यागे वि०॥ ओं यदपां घोरं यदपां क्रूरं य
दपामशांतमति तत्सृजामि॥ भूमौ त्यजेत्॥ ततः पुनरपि ब्रह्मचारी ताभिरद्भिः स्वांजलिं
पूरयित्वाऽनेन मंत्रेण दह्नस्य० यजुः रोचनो दे०॥ समावर्त्तने ब्रह्मचार्युदकांजलिरात्माभि
षेचने वि०॥

१इत्यात्मन
भिषिंचेत्॥

ॐ यो रोचनस्तमिह गृह्णामि तेनाहं मामभिषिंचामि॥ ततः पुनरपि पूर्ववद्देवस्यांजलिं पूर
रयित्वाऽनेन मंत्रेण द्रष्ट॰ यजुः रोचनो दे॰॥ समाव॰ ब्रह्म॰ जलिरात्माभिषेचने वि॰॥
ॐ यशसे तेजसे ब्रह्मवर्चसाय बलायेंद्रियाय वीर्यायान्नाद्याय रायस्पोषाय त्विष्या अपचि घा ४३
त्यै॥ इत्यात्मनभिषिंचेत्॥ पुनस्तथैवोदकांजलिं गृहीत्वा॥ द्रष्ट॰ षडष्टकाम महापंक्तीछंदः॥
अश्विनो दे॰॥ समावर्त्तने ब्रह्मचार्युदकांजलिरात्माभिषेचने वि॰॥ ॐ येन स्त्रियमकृणुतं
येनापामृशतं सुरां॥ येनाक्षानभ्यषिंचतं येनेमां पृथिवीं महीं॥ यद्वां तदश्विना यश
स्तेन मामभिषिंचतं॥ इत्यात्ममभिषिंचति॥ ततस्तूष्णीं चतुर्थमभिषेचने॥ ततोऽभिषे
चतुर्भिर्मंत्रैः१ कानन्तरं आदित्याभिमुखउत्थाय ब्रह्मचार्यादित्यमुपतिष्ठेत्॥ द्रष्ट॰ यजुः इंद्रो दे॰॥ कर्मान्तर॥

आदित्योपस्थाने वि०॥ ॐ उद्यन् भ्राज भृष्टिभिरिंद्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थात्॥ द
शसनिरसि दशसनिं मा कुर्वा त्वा विशाम्या मा विश॥ ॐ चक्षुरसि चक्षुष्टुमस्य वमे पा
प्मानं जहि सोमस्त्वा राजावतु नमस्तेस्तु मामा हिंसीः॥ ॐ उद्यन् भ्राज भृष्टिरिंद्रो
मरुद्भिरस्थात्सांतपनेभिरस्थात्॥ शतसनिरसि शतसनिं मा कुर्वा त्वा विशाम्या मा
विश॥ ॐ चक्षुरसि चक्षुष्टुमस्य वमे० हिंसीः॥ ॐ उद्यन् भ्राज भृष्टिभिरिंद्रो० स्थात्सा
यंयावभिरस्थात्॥ सहस्रसनिरसि सहस्रसनिं मा कुर्वा त्वा विशाम्या मा विश॥ ॐ च
क्षुरसि चक्षुष्टु० हिंसीः॥ इत्युपस्थाय॥ ततो ब्रह्मचारी मेखलां ऽधोमार्गेणानेन मंत्रे
ण मोचयेत्॥ उदुत्तममिति शुनःशेप ऋषिः॥ त्रिष्टुप् छंदः॰ वरुणो दे०॥ मेखलामोचने वि०॥

ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमं॰श्रथाय॥ अथादित्यव्रतेवयंतवानाग
सोऽअदितयेस्याम॥ अत्रैवदंडाजिनयोःदक्षिणाःगःवृत्तव्यः॥ ततोब्रह्मचारीत्रीन्ब्रा
ह्मणान्भोजयित्वास्वयंभुक्त्वा॥ शिखावर्जयनखलोमानिवापयीत॥ ततःस्नानंकुं
डलादिनान्हतनस्तुष्कंवाससीपरिधयैवमुत्तरीयंद्वितीयमधरं॥ ततःश्वेतपुष्पमा
लांवंवेशिष्यासांवामूर्द्ध्निबध्नीयात्॥ दक्ष॰ एवप्रजागायत्री॰श्रीर्देव॰॥ स्रग्बंधनेवि॰॥
ॐश्रीरसिमयिरमस्व॥ ततोऽनेनमंत्रेणउपानहोपरिदध्यात्॥ दक्ष॰यजुःउपानहौ
देव॰॥ उपानहोपरिधानेवि॰॥ ॐनेत्र्योस्थोनयतंमा॥ ततःस्वप्रमाणंवेणवंदंडंगृ   वृमांतर॥
ह्णात्यनेनदक्ष॰यजुःदंडोदे॰॥ दंडग्रहणेवि॰॥ ॐगंधर्वोसिसुपावउपमामव॥ [illegible]ः ॥७८॥

२तत्रोपविशेत्॥

॥अथ शिष्य निरीक्षणेक्षानेन॥दक्ष० यजुः आचार्यो दे०॥निरीक्षणे वि०॥ॐय क्षमि
वचक्षुषः प्रियो वो भूयासी॥आचार्यः उष्ठादिस्पर्शयेदनेन॥प्रजापति० अनुष्टुप्०॥
जिह्वा दे०॥ओष्ठादिस्पर्शने वि०॥ॐ ओष्ठापिधाना नकुली दंतपरिमितः पविः॥जिह्वे मा विह्व
लो वाचं चारु माद्येह वा दय॥ततः आपस्त्वितादि गोदक्षिणा वामदेव्यगानांते तंत्रं
समापयेत्॥०॥ ॥अथाचार्यस्तं स्नातकं मधुपर्केणाभर्हयेत्॥अथ स्नातकः रथंगान्य
भिमर्शं जपेदनेन॥प्रजापति० त्रिष्टुप्० रथो दे०॥रथांगाभिमर्शने वि०॥ॐ वनस्पते वी
ड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः॥गोभिः संनद्धो असि वीडयस्व॥अथ र
थमारोहयेदनेन॥दक्ष० त्रिष्टुप्छं०॥रथो दे०॥आरोहणे विनि०॥ॐ आस्थाता ते जय
उजेत्वानि॥

79

॥०॥ ततःप्राङ्मुखउदङ्मुखोवारथेनगत्वादक्षिणेनपरावृत्याचार्यसमीपमनुपग
च्छति॥ आचार्यःपुनरर्घंदद्यात्॥ ततोयदिपितैवाचार्यस्तदाकर्मकारयितृब्राह्म
णायदक्षिणांदद्यात्॥ पितैव॥ अथान्यएवाचार्यस्ततःसतस्मैदक्षिणांदद्यात्॥ ॥
॥इतिसमावर्त्तनकर्मसमाप्तं॥०॥ ॥इतिदशकर्मपद्धतिःसमाप्तः॥०॥ ॥०॥
संवत् १७२६ वर्षेश्रावणवदि १२ बुधेलिखितं॥ श्रीपरांमजीसुतत्रास्तरजी
सुतमाधवजीकेन्य अविमुक्तवाराणसीमध्येस्वहस्तेनलिखितं॥०॥ ॥०॥
॥०॥ ॥०॥०॥ ॥०॥०॥ ॥०॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥

कर्मांतर॥
॥७९॥

समावरतंन दसकुर्मपधती

१२५८